श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अभिरामवरगुरुभिः अनुगृहीता

# ॥ नक्षत्रमालिका ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ नक्षत्रमालिका ॥

अस्मासु वत्सलतया कृपया च भूयः
स्वेच्छावतीर्णमिव सौम्यवरं मुनीन्द्रम्।
आचार्यपौत्रमभिराामवराभिधानम्
अस्मद्गुरुं परमकारुणिकं नमामि॥

श्रीमान् पराङ्कुशमुनिर्जीयात् यज्ज्ञानमुद्रया।
नेन्द्रियाश्वयुजो नृणां नित्यं विषयवीथयः॥ १॥

यदुरसि भरणीया स्रग्विकसितवकुळानद्धा।
स जयति महिमा नाथो मुररिपुपदसक्तो नः॥ २॥

नन्तानन्ताङ्घ्रिनलिनयुग्मे कर्ता लोकार्तिकबलनानाम्।
भद्राय द्राविडनिगमानां द्रष्टा पुष्टाय वकुळभृत्स्यात्॥ ३॥

स्यादेव सा मे फणितिश्शठारेः ययोदितोच्चैः सरणिर्जनानाम्।
आरोहिणी नाप्यवरोहिणी हि वेदोदिता तु द्वयमभ्युपैति॥ ४॥

तिलकमाह न काचिदपि श्रुतौ त्रिजगतामृगशीर्षसमुत्थिता।
स्फुटतरं वकुळाभरणीयवाक् पुरुषमादिमशेषपदैरपि॥ ५॥

पित्रादिस्सकलविधोपि बन्धुवर्गः यस्यासीत्सरसिजवासिनीसहायः।
आविस्स्युर्घनकरुणारसावसेकैः आर्द्रा मे वकुळभृतः कटाक्षपाताः॥ ६॥

तामाश्रयामि करुणां वकुळाभिरामां यासौ पुनर्वसुमतीवलयेवतीर्णा।
प्रज्ञादृशोन्मिषितया प्रथितानुभावा ज्योतिः परं यदनिदं तदिदं चकार॥ ७॥

रचितवति रमायाः नायकस्याङ्घ्रिपुष्यत्प्रणयरससुधाब्धिस्रोतसि स्वैरगाहम्।
प्रभवति कलिघर्मप्रावृषेण्याम्बुवाहे वकुळधरमुनीन्द्रे तापवार्ता कथं नः॥ ८॥

नमज्जनस्य चित्तभित्तिभक्तिचित्रतूलिका
    भवाहिवीर्यभञ्जने नरेन्द्रमन्त्रयन्त्रणा।
प्रपन्नलोककैरवप्रसन्नचारुचन्द्रिका
    शठारिहस्तमुद्रिका हठाद्धुनोतु मे तमः॥ ९ ॥

मनस्स्फटिकदर्पणप्रतिफलत्परब्रह्मणः
    प्रदर्शनमिवाचरन् प्रथितबोधमुद्राङ्कितः।
सतामभयशंसिता भवभयाभितप्तात्मनाम्
    अघानि शमयेत नः शठरिपोरवामः करः॥ १० ॥

रमयतु शठशत्रुरत्युन्नताचारयुक्तैर्जनैः
    अवनतपदपद्मयुग्मोनुकम्पामृतांभोनिधिः।
बहुविधकृतपूर्वफल्गुन्यगाचारचिन्ताकुलं
    हृदयमसदृशात्मपादारविन्दानुषङ्गान्मम॥ ११ ॥

मग्नं मानस मा स्म भूश्शठरिपोरव्याजसिद्धा दया
    नौका काचन नाविकोपि स पुनः सन्तारकग्रामणीः।
एतेनोत्तरफल्गुनीरसपरिक्लिष्टोपभोगोर्मिकं
    दुःखावर्तदुरन्तपारगमनं संसारवाराकरम्॥ १२ ॥

रत्नदीपिकायमानहस्तमुद्रिकाकृतत्रयीगिरीन्द्र-
    कन्दरान्तरालगाढरूढरूढिमन्निधानसूचनेन।
द्राविडागमोपगीतिमूलसेकशीतवीतनिद्रपत्रदिव्य-
    तिन्त्रिणीसमीपगेन नाथवानहं पराङ्कुशेन॥ १३ ॥

नत्या न त्यागकारी क्षणमपि चिदचिन्नायकामेयकामे
    छन्दश्छन्दस्वरूपे महसि कमलया भासमानेऽसमाने।
श्रेयः श्रेयस्विसङ्घैः परिचयसुरभिः कैसराणां सराणां
    पातात्पाताद्भवाब्धौ शठरिपुरिह नो वीक्षणेन क्षणेन॥ १४ ॥

न प्रपत्तिवर्त्मनः प्रवर्तनापदानवासनानुसारि-
    नव्यपेतसर्वदाजलाशयान्वयं कथं समं सरोजम्।

स्वातिकामियोगिबृन्दचित्तपद्मबद्धसौहृदानुरक्त-
रूपयोश्शठारिपादयोर्युगेन सन्नतार्तिभञ्जनेन॥ १५॥

नत्वा यां कुसुमायुधेषुधिरुचिव्याघातमातन्वती
शेमुष्या महतामहायि तरुणीजङ्घासु जङ्घालता।
विस्तीर्णच्छविशाखया शठरिपोर्वृत्तानुपूर्वीजुषा
जङ्घाकल्पतरुश्रिया सुरभितं चिन्तावनं मामकम्॥ १६॥

कनदवयवलोलशोभाभिधानापगास्रोतसः
समुदितगुरुबुद्बुदाकारसन्देहसन्दायिनोः।
ककुदधिगतमित्रभावं स्वभावाद्युगं जानुनोः
मम हृदि शठवैरिनाम्नो मुनीन्द्रस्य सन्दीव्यतु॥ १७॥

तुलासरणिसीमनि प्रथितरूपया हस्तिनां
करेण करभेण वा कदलिकाप्रकाण्डेन वा।
तथोपरि च पश्यतां नयनबन्धनज्येष्ठया
चमत्कृतिमती मतिश्शठरिपूरुलक्ष्म्या मम॥ १८॥

महः प्ररोहमञ्जरीमनोज्ञरत्नमेखला-
कलापपुष्पिता कटीतटीपटी शठद्विषः।
उरस्स्रवत्प्रभाझरीनिपातनिम्ननाभिका-
ऽवटोत्थफेनमण्डलीवितर्कमूलमेव नः॥ १९॥

नयनसुभगनाभीमुद्दिशन्ती शठारेः
सर इति परिभाषा ढौकते सार्थकत्वम्।
सततमितरथा नः संहता नेत्रमीनाः
कथमिह विहरेयुः कौतुकोद्रेकयुक्ताः॥ २०॥

तां मध्यदेशसुषमामवलोकयामि
रोमावलित्रिवलिकारुचिरां शठारेः।
रेखोत्तरा यदुपमामधिकाभिलाषा
ढौकेत वा यदि न वा वटपत्रशोभा॥ २१॥

भासा न व्यतिभिदुरीभवन्ति भृङ्गाः
हारस्थादुरसि हरिन्मणेश्शठारेः।
आरूढा वकुळमयीं स्रजं सुगन्धिं
शब्देन श्रवणसुखेन यान्ति भेदम्॥ २२॥

दमवतः कुरुते मदनोद्धतान्
सुघटयत्यबुधान् बुधनिष्ठया।
प्रथितमुद्रमनिद्रसरोरुह-
प्रणयि पाणितलं शठजिन्मुनेः॥ २३॥

नेह संसरणरोगसंहृतिः जायते शतभिषक्चिकित्सया।
अन्तरेण शठवैरिकन्धरालंबमानवकुळस्रजां रजः॥ २४॥

जन्मध्वंसं दिशति जनानां वक्त्रं दीप्रोष्ठपदमनोज्ञम्।
मन्दस्मेरं मधुरकटाक्षं सुभ्रूरेखं सुभगकपोलम्॥ २५॥

लसति हि भजतां भद्रोत्तरपदकरणारूढम्।
शठरिपुमकुटं भासा परिहृतदुरितध्वान्तम्॥ २६॥

अन्तरेण शठारातिं कस्संसारेवतीह नः।
तदहं हृदये नित्यं निदधे तद्वपुश्श्रियम्॥ २७॥

वाचिकी वरिवस्या मे तारकामालिकात्मिका।
पराङ्कुशपदाब्जेन परिष्कारवती भवेत्॥ २८॥

॥ इति नक्षत्रमालिका संपूर्णा॥